मला भावलेले मेघदूत

धनश्री लेले

साहित्य प्रतिष्ठान ®

मला भावलेले मेघदूत

(कालिदासविरचित संपूर्ण मेघदूतासह)

धनश्री लेले

ई साहित्य प्रतिष्ठान

मला भावलेले मेघदूत

लेखिका : धनश्री लेले

ई-मेल : dhanashreelele01@gmail.com

मेघदूत : महाकवी कालिदास

मुखपृष्ठ : कनक वाईकर

छायाचित्रे : महेंद्र कुलकर्णी

निर्मिती सहाय्य : विद्या पालकर

ई साहित्य प्रतिष्ठान

फ़ोन : 9869674820

esahity@gmail.com

पत्ता : जी ११०२, इटर्निटी

तीन हात नाका , ठाणे, ४००६०४

Websites

- *www.esahity.com*
- *www.ednyaneshwari.com*
- *http://etyarth.blogspot.in/*
- *http://esahityapratishthan.blogspot.in/*
- *www.marathiriyasat.com*

ई साहित्य प्रतिष्ठान ही नोंदणीकृत संस्था असून अनेक लेखक वाचकांनी एकत्र येऊन सुरू केली. संस्थेतर्फ़े दर आठवड्याला एक मराठी ई पुस्तक चाळीस देशांतील सुमारे दीड लाख वाचकांना विनामूल्य वितरित केले जाते. त्याशिवाय ई साहित्यच्या विविध वेबसाईट्सना लाखो लोक व्हिजिट करतात.

मला भावलेले मेघदूत

विनामूल्य वितरणासाठी उपलब्ध

आपले वाचून झाल्यावर आपण हे फ़ॉरवर्ड करू शकता.

हे ई पुस्तक वेबसाईटवर ठेवण्यापुर्वी किंवा वाचनाव्यतिरिक्त कोणताही वापर करण्यापुर्वी ई साहित्य प्रतिष्ठानची परवानगी घेणे आवश्यक आहे.

या पुस्तकातील लेखनाचे सर्व कायदेशीर हक्क लेखिकेकडे सुरक्षित असून पुस्तकाचे किंवा त्यातील अंशाचे पुनर्मुद्रण किंवा नाटक, सिनेमा, सिरियल, स्टेज शो किंवा तत्सम रुपांतर किंवा भाषांतर करण्यासाठी लेखिकेची परवानगी घेणे कायद्याने आवश्यक आहे.

©esahity Pratishthan® 2013

मला जर कधी काळी एका निर्जन बेटावर जावे लागले आणि सोबत फ़क्त एकच पुस्तक न्यायची परवानगी मिळाली तर मी “मेघदूत” निवडेन.

-कुसमाग्रज



मला भावलेले मेघदूत

www.esahity.com

मला भावलेले मेघदूत

धनश्री लेले

www.esahity.com

दरवर्षी आषाढाचा पहिला दिवस आला की मेघदूत काढायचं आणि 'कश्चित कांता विरहगुरुणा...' या पहिल्या श्लोकापासून ते 'माभूदेवं क्षणमपिच ते विद्युता विप्रयोगः' या शेवटच्या श्लोकाच्या शेवटच्या ओळीपर्यंत वाचून काढायचं, दरवर्षी त्या मेघाबरोबर रामगिरी ते अलकानगरी हा प्रवास करायचा, तेच पर्वत, त्याच नद्या, तीच वृक्षराजी पहायची.

पण दरवर्षी काहीतरी नवीन दिसतं, मेघदूतातल्या नवीन सौंदर्यस्थळांचा शोध लागतो. 'प्रतिक्षणं यत् नवतामुपैति' हीच प्रतिभेची व्याख्या. इतकी वर्षं होऊनही दरवेळेला मेघदूतातलं सौंदर्य नव्याने प्रतीत होतं हेच तर प्रतिभावान कवीचं लक्षण. 'मेघे मेघे वयोगतम्!' म्हणतात ते म्हणूनच. पण खरंच दरवर्षी नव्याने आस्वाद घ्यावा असं आहे तरी काय या मेघदूतात?

का भावतं हे मनाला?


मुळात मेघदूताची कथा, अगदी छोटीशी, पहिल्याच श्लोकात सांगून टाकलेली. 'स्वाधिकारात प्रमत्त... शापेनास्तंगमितमहिमा'. स्वतःच्या कर्तव्यात कोणी एक यक्ष चुकला. त्याला शिक्षा म्हणून कुबेराने त्याला शाप दिला. तो शाप भोगण्यासाठी यक्ष रामगिरीवर येऊन राहिला. विरहाचे आठ महिने संपले होते. उरले होते फ़क्त चार महिने. पण हे चार महिने काढणं फ़ार अवघड. कारण हे चार महिने आहेत पावसाळयाचे. यक्षाला आपल्या पत्नीची अत्यंत तीव्रतेने आठवण येतेय. तिने हा विरहाचा आघात कसा झेलला असेल? तिलाही दिलासा द्यायला हवा ना! तिला आपण कुशल असल्याचा निरोप पाठवायला हवा. पण इतक्या लांब जाणार कोण? इतक्यात आषाढ महिन्यातला पहिलावहिला मेघ यक्षाच्या दृष्टीस पडतो. मेघ हे कामरूपधारी आहेत आणि दूरवर जाऊ शकतात. हा विचार करून यक्ष मेघाच्या मार्फ़त निरोप पाठवायचं ठरवतो. आणि मेघ दताच्या भमिकेत आह्रे असं मानन यक्ष स्वगतातन त्याच्याशी संवाद साधतो.


एवढी छोटीशी कथा.

त्यावर ११६ श्लोक, मेघासारख्या अचेतनाला दूत म्हणून नेमणं आणि स्वगतातून संवाद, हे सगळंच इतकं कल्पक आहे की मन प्रथम त्यानेच भारून जातं. बरं मेघाला- एका अचेतनाला- आपण दूत म्हणून पाठवतोय हे समजण्याएवढं यक्षाचं भानावर असणं... पण 'कामार्ता हि प्रकृतिकृपणश्चेतनाचेतनेषु'- विरहाने व्याकुळ झालेलं कोणीही चेतन अचेतन, सजीव निर्जीव या बाबतीत विवेकशून्यच असतं, असं यक्षानं दिलेलं उत्तर. त्यामुळे एका छोट्याशा ओळीतून चोखंदळ वाचकाच्या मनला पडणारे अवास्तवाबद्दलच्या प्रश्नांचं होणारं निरसन... यातून कालिदास भावनातिरेकाने लिहित नाही तर त्यामागेही भावनेचं शास्त्र, लॉजिक आहे, याचं येणारं प्रत्यंतरही मनाला सुखावून जातं. आणि तेही सगळं सूचक पद्धतीतून सांगितलं जातं, बटबटीतपणा नावालाही नाही.

हा मेघ जसजसा रामगिरीवरून अलकानगरीच्या दिशेने प्रवास सुरू करतो तसतसं आपणही मनाच्या रथावर आरूढ होऊन त्याच्या वेगाने जायला लागतो. जणू मेघांच्या हातात हात गुंफून. आणि गंमत म्हणजे जे पर्वत, ज्या नद्या आपण एरवी भूतलावरून पहातो, तेच पर्वत, त्याच नद्या आकाशातून पाहिल्यावर कसे दिसतील ते आपल्या डोळयांना दिसायला लागते. ...... माळेत गुंफ़लेलं जांभळया निळया रंगांचं इंद्रनील मण्यांचं पदकच...! ही अशी वर्णनं त्या पर्वतांना, नद्यांना एक वेगळंच रूप देऊन जातात. आणि कालिदासाच्या प्रतिभाशक्तीनं आपण क्षणोक्षणी अचंबित होऊन जातो. खरंच कालिदासाने विमान प्रवास केला होता कि काय? हि सगळी एरिअल फोटोग्राफी त्याला कशी जमली? असे प्रश्न पडल्या शिवाय राहत नाही .

मेघ आकाशातून अलकानगरीच्या दिशेनं निघाला की शेतामध्ये कामकरणाऱ्या स्त्रिया, (पथिकवनिता), आपल्या डोळयांवर येणाऱ्या केसांच्या बटा बाजूला सारून मोठ्या उत्कंठेने मेघाकडे पहातील. “केसांच्या बटा बाजूला सारून” असं लिहिण्याचं काय कारण? त्या स्त्रिया ’पथिक वनिता” आहेत, म्हणजे त्यांचे पती बाहेरगांवी गेलेले आहेत. त्या ’प्रोषितभर्तृका’ आहेत. प्रोषितभर्तृकांनी वेणीफ़णी करू नये असा संकेत आहे, त्यांचे केस मोकळे असतील. तू आलास म्हणजे बाहेरगांवी गेलेले त्यांचे पतीही आता परत येतील... म्हणून त्या बटा बाजूला सारून उत्कंठित होऊन तुझ्याकडे पहातील... हे एवढं सगळं आपण जे सांगतो ते ’उद्‌गृहीतालकान्ताः’ या एका शब्दात कालिदासाने सांगून टाकलं... अशी सूचकतेची अनेक उदाहरणं मेघदूतात सर्वत्र विखुरली आहेत.






मेघदूतम्



कालीदासाच्या भौगोलिक ज्ञानाविषयी तर काय बोलावं? मेघाला रामगिरी ते अलकानगरी हा मार्ग सांगत एकंदर २५ ठिकाणांची वर्णनं केलेली आहेत. फक्त स्थानांचे उल्लेख नाहीत तर तिथल्या नद्या, पर्वत, शेती, पिके, वनस्पतीजीवन, प्राणीजीवन, कीटकसृष्टी, पुष्पसृष्टी, पौराणिक कथा, वैशिष्टयं हे सगळे वर्णिलेलं आहे. तेही काव्याच्या सुंदर मखमली आवरणात. काव्य म्हणून काव्याचा आस्वाद घ्यावा आणि त्या बरोबर उत्तर भारताचा भूगोलही पक्का करावा. भूगोलासारखा विषय अशा काव्यात्म पद्धतीने रेखाटता येतो.

पूर्व मेघात केलेली वर्णन जरी काव्यात्म असली तरी भौगोलिक आहेत त्यामुळे ती वर्णनं सत्याच्या कक्षेतच करायला हवीत. ती तशीच आहेत. आणि उत्तरमेघ सुरु होतो तो मात्र अलकानगरीच्या वर्णनाने, जी संपूर्ण पणे कल्पित नगरी आहे. एकाच काव्यात सत्य वर्णनं आणि कल्पित वर्णनं यांचा तोल किती उत्तम तऱ्हेने साधता येऊ शकतो याचं उत्तम उदाहरण म्हणजे मेघदूत !

मेघाची दूत म्हणून निवड झाल्यापासून तो अलकानगरीत येऊन निरोप सांगेपर्यंत तो मेघ आपल्याही नजरेत सचेतन होतो ही कवीची किमया. फ़क्त मेघ सचेतन होतो असं नाही तर त्याच्या भावभावनांचाही विचार कवीमुळे आपण करायला लागतो. 'मेघा रात्र झाली असेल तर थोडा विसावा घे , तुझी पत्नी सौदामिनी चमकून दमली असेल तिलाही थोडी विश्रांती घेऊ दे. पण सकाळ झाली कि मात्र आगे बढो ! '

असं जेव्हा यक्ष सांगतो तेव्हा आपणही 'हो! हे बरोबरच आहे' असंच मानायला लागतो.

सगळा निरोप सांगून झाल्यावर मेघ काहीच बोलत नाही, तेव्हा आपल्याही मनात प्रश्न पडतो. मेघाने हे मौन का बरं धारण केलंय? इतका तो सजीव रुपात आपल्याला दिसायला लागतो. शेवटच्या श्लोकात तर मेघाचं सजीवत्व व्दिगुणीत केलंय. कारण यक्ष त्याला आशीर्वाद देतो. –' मा भूदेवं क्षणमपि च ते विद्युता वि प्रयोगः 'माझा आणि माझ्या पत्नीचा वियोग झाला तसा तुझा आणि तुझ्या पत्नीचा, विद्युलत्तेचा वियोग कधीही होऊ नये.' आपणही या आशिर्वादाला दुजोरा देतो. अचेतनाला इतकं सचेतन करण्याचं कवि कुल गुरूचं केवढं हे कसब!

यातले मंदाक्रांता वृत्तातले श्लोक, नाद माधुर्य, यातला विषय, केलेली वर्णनं, वापरलेले अलंकार, भावभावना, रंगांची उधळण, टवटवीतपणा, वेगळेपणा, मांडणी, रंजकता, छोट्याश्या बीजावर खुलवलेलं एवढं नाट्य, या साऱ्यांमुळे पुन्हा पुन्हा मेघदूत वाचावं आणि वाचत रहावंसं वाटतं. 'तैसे नित्य नूतन देखिजे। गीतातत्त्व॥' असं माऊली म्हणतात तसं 'तैसे नित्य नूतन देखिजे। मेघदूत॥' हेच खरं. या सगळया कारणांनी, शिवाय त्यात संस्कृत भाषेचा असलेला डौल आणि त्यातही कालिदासाची प्रसन्न शैली यामुळे हे काव्य मनाला भावतं, किंबहुना एखादं भावगीत होऊन ते कायम ओठावर, जीव्हाग्री खेळत राहतं.

मेघदूत

कालिदास कृतम् ..

www.esahity.com

खंड १

पूर्वमेघ

कश्चित् कान्ताविरहगुरुणा स्वाधिकारात्प्रमत्त:

शापेनास्तङ्गमितहिमा वर्षभोग्येण भर्तु: ।

यक्षश्चक्रे जनकतनयास्नानपुण्योदकेषु

स्निग्धच्छायातरुषु वसतिं रामगिर्याश्रमेषु ॥१॥

तस्मिन्नद्रौ कतिचिदबलाविप्रयुक्त: स कामी

नीत्वा मासान् कनकवलयभ्रंशरिक्तप्रकोष्ठ: ।

आषाढस्य प्रथमदिवसे मेघमाश्लिष्टसानुं

वप्रक्रीडापरिणतगजप्रेक्षणीयं ददर्श ॥२॥

तस्य स्थित्वा कथमपि पुर: कौतुकाधानहेतो:
अन्तर्बाष्पश्चिरमनुचरो राजराजस्य दध्यौ ।
मेघालोके भवति सुखिनोऽप्यन्यथाव्रत्ति चेत:
कण्ठाश्लेषप्रणयिनि जने किं पुनर्दूरसंस्थे ॥३॥

प्रत्यासन्ने नभसि दयिताजीवितालम्बनार्थी
जीमूतेन स्वकुशलमयीं हारयिष्यन् प्रव्रत्तिम् ।
स प्रत्यग्रै: कुतजकुसुमै: कल्पितार्घाय तस्मै
प्रीत: प्रीतिप्रमुखवचनं स्वागतं व्याजहार ॥४॥

धूमज्योति: सलिलमरुतां संनिपात: क्क मेघ:

संदेशार्था: क्क पतुकरणै: प्राणिभि: प्रापणीया: ।

इत्यौत्सुक्यादपरिगणयन् गुह्यकस्तं ययाचे

कामार्ता हि प्रकृतिकृपणाश्चेतनाचेतनेषु ॥५॥

जातं वंशे भुवनविदिते पुष्करावर्तकानां

जानामि त्वां प्रकृतिपुरुषं कामरूपं मघोन: ।

तेनार्थित्वं त्वयि विधिवशाद्दूरबन्धुर्गतोऽहं

याच्ञा मोघा वरमधिगुणे नाधमे लब्धकामा ॥६॥

संतप्तानां त्वमसि शरणं तत् पयोद प्रियाया:

संदेशं मे हर धनपतिक्रोधविश्लेषितस्य ।

गन्तव्या ते वसतिरलका नाम यक्षेश्वराणां

बाह्योद्यानसिथतहरशिरश्चन्द्रिकाधौतहर्म्या ॥७॥

त्वामारूढं पवनपदवीमुग्द्रहीतालकान्ता:

प्रेक्षिष्यन्ते पथिकवनिता: प्रत्ययादाश्वसन्त्य: ।

क: संनद्धे विरहविधुरां त्वय्युपेक्षेत जायां

न स्यादन्योऽप्यहमिव जनो य: पराधीनव्रत्ति: ॥८॥

तां चावश्यं दिवसगणनातत्परामेकपत्नीं
अव्यापन्नामविहतगतिर्द्रक्ष्यसि भ्रात्रजायाम् ।
आशाबन्ध: कुसुमसदृशं प्रायशो ह्यग्ङनानां
सघ:पाति प्रणयि हृदयं विप्रयोगे रूणद्धि ॥९॥

मन्दं मन्दं नुदति पवनश्चानुकूल् यथा त्वां
वानश्चायं नदति मधुरं चातकस्ते सगन्ध: ।
गर्भाधानक्षणपरिचयान्नूनमाबद्धमाला:
सेविष्यन्ते नयनसुभगं खे भवन्तं बलाका: ॥१०॥

कर्तुं यच्च प्रभवति महिमुच्छिलीन्ध्रामवन्ध्यां
तच्छ्रुत्वा ते श्रवणसुभगं गर्जितं मानसोत्का: ।
आ कैलासाद्बिसकिसलयच्छेदपाथेयवन्त:
संपत्स्यन्ते नभसि भवतो राजहंसा: सहाया: ॥११॥

आपृच्छस्व प्रियसखममुं तुङ्गमालिङ्ग्य शैलं
वन्धै: पुंसां रघुपतिपदैरङ्कितं मेखलासु ।
काले काले भवति भवतो यस्य संयोगमेत्य
स्नेहव्यक्तिश्चिरविरहजं मुञ्चतो वाष्पमुष्णम् ॥१२॥

मार्गं तावच्छ्रृणु कथयतस्त्वत्प्रयाणानुरूपं
संदेशं मे तदनु जलद श्रोष्यसि श्रोत्रपेयम् ।
खिन्न: खिन्न: शिखरिषु पदं न्यस्य गन्तासि यत्र
क्षीण: क्षीण: परिलघु पय: स्त्रोतसां चोपभुज्य ॥१३॥

अद्रे: शृग्ङं हरति पवन: किं स्विदित्युन्मुखिभि
र्दृष्टोत्साहश्चकितचकितं मुग्धसिद्धाग्ङनाभि: ।
स्थानादस्मात् सरसनिचुलादुत्पतोदङ्मुख: खं
दिङ्नागानां पथि परिहरन् स्थुलहस्तावलेपान् ॥१४॥

रन्तच्छायाव्यतिकर इव प्रेक्ष्यमेतत् पुरस्ताद्
वल्मीकाग्रात् प्रभवति धनुष्खण्डमाखण्डलस्य ।
येन श्यामं वपुरतितरां कान्तिमापत्स्यते ते
बर्हेणेव स्फुरितरूचिना गोपवेशस्य विष्णो: ॥१५॥

त्वय्यायत्तं कृषिफलमिति भ्रूविलासानभिज्ञै:
प्रीतिस्निग्धैर्जनपदवधूलोचनै: पीयमान: ।
सघ:सीरोत्कषणसुरभि क्षेत्रमारूह्य मालं
किंचित्पश्चाद्व्रज लघुगतिर्भूय एवोत्तरेण ॥१६॥

www.esahity.com

त्वामासारप्रशमितवनोपप्लवं साधु मूर्ध्ना
वक्ष्यत्यध्वश्रमपरिगतं सानुमानाम्रकूट: ।
न क्षुद्रोऽपि प्रथमसुकृतापेक्षया संश्रयाय
प्राप्ते मित्रे भवति विमुख: किं पुनर्यस्तथोच्चै: ॥१७॥

छन्नोपान्त: परिणतफलद्योतिभि: काननाम्रै:
त्वय्यारूढै शिखरमचल: स्निग्धवेणीसवर्णे ।
नूनं यास्यत्यमरमिथुनप्रेक्षनीयामवस्थां
मध्ये श्याम: स्तन इव भुव: शेषविस्तारपाण्डु: ॥१८॥

स्थित्वा तस्मिन् वनचरवधूभुक्तकुञ्जे मुहूर्तं
तोयोन्सर्गद्रुततरगतिस्तत्परं वर्त्म तीर्णः ।
रेवां द्रक्ष्यस्युपलविषमे विन्ध्यपादे विशीर्णां
भक्तिच्छेदैरिव विरचितां भूतिमङ्गे गजस्य ॥१९॥

तस्यास्तिक्तैर्वनगजमदैर्वासितं वान्तवृष्टिः
जम्बूकुञ्जप्रतिहतरयं तोयमादाय गच्छेः ।
अन्तःसारं घन तुलयितुं नानिलः शक्ष्यति त्वां
रिक्तः सर्वो भवति हि लघुः पूर्णता गौरवाय ॥२०॥

नीपं दृष्ट्वा हरितकपिशं केसरैरर्धरूढै:
आविर्भूतप्रथममुकुला: कन्दलीश्चानुकच्छम् ।
जग्ध्वारण्येष्वधिकसुरभिं गन्धमाघ्राय चोर्व्या:
सारङ्गास्ते जललवमुच: सूचयिष्यन्ति मार्गम् ॥२१॥

उत्पश्यामि द्रुतमपि सखे मत्प्रियार्थं यियासो:
कालक्षेपं ककुभसुरभौ पर्वते पर्वते ते ।
शक्लापाङ्गै: सजलनयनै: स्वागतीकृत्य केका:
प्रत्युद्यात: कथमपि भवान् गन्तुमाशु व्यवस्येत् ॥२२॥

अम्भोबिन्दुग्रहणचतुरांश्चातकान् वीक्षमाणा:
श्रेणीभूता: परिगणनया निर्दिशन्तो बलाका: ।
त्वामासाद्य स्तनितसमये मानयिष्यन्ति सिद्वा:
सोत्कम्पानि प्रियसहचरीसंभ्रमालिङ्गितानि ॥२३॥

पान्डुच्छायोपवनवृतय: केतकै: सूचिभिन्नै:
नीडरन्भैर्गृहबलिभुजामाकुलग्रामचैत्या: ।
त्वय्यासन्नै परिणतफलश्यामजम्बूवनान्ता:
संपत्स्यन्ते कतिपयदिनस्थायिहंसा दशार्णा: ॥२४॥

तेषं दिक्षु प्रथितविदिशालक्षणां राजधानीं
गत्वा सघ: फलमविकलं कामुकत्वस्य लब्धा ।
तीरोपान्तस्तनितसुभगं पास्यसि स्वादु यस्मात्
सभ्रूभग्ङं मुखमिव पयो वेत्रवत्याश्चलोर्मि ॥२५॥

नीचैराख्यं गिरिमधिवसेस्तत्र विश्रामहेतो:
त्वत्संपर्कात् पुलकितमिव प्रौढपुष्पै: कदम्बै: ।
य: पण्यस्त्रीरतिपरिमलोग्दारिभिर्नागराणां
उद्दामानि प्रथयति शिलावेश्मभिर्यौवनानि ॥२६॥

विश्रान्त: सन् व्रज वननदीतीरजातानि सिञ्चन्न
उद्यानानां नवजलकणैर्यूथिकाजालकानि ।
गण्डस्वेदापनयनरूजाक्लान्तकर्णोत्पलानां
छायादानात् क्षणपरिचित: पुह्पलावीमुखानाम् ॥२७॥

वक्र: पन्था यदपि भवत: प्रस्थितस्योत्तराशां
सौधोत्सग्ङप्रणयविमुखो मा स्म भूरूज्जयिन्या: ।
विद्युद्दमस्फुरितचकितैस्तत्र पौराग्ङनानां
लोलापाग्ङैर्यदि न रमसे लोचनैर्वञ्चितोऽसि ॥२८॥

विचिक्षोभस्तनितविहगश्रेणिकाञ्चीगुणाया:

संसर्पन्त्या: स्खलितसुभगं दर्शितावर्तनाभे: ।

निर्विन्ध्याया: पथि भव रसाभ्यन्तर: सन्निपत्य

स्त्रीणामाद्यं प्रणयवचनं विभ्रमो हि प्रियेषु ॥२९॥

वेणीभूतप्रतनुसलिलासावतीतस्य सिन्धु:

पाण्डुच्छाया तटरुहतरुभ्रंशिभिर्जीर्णपर्णै: ।

सौभाग्यं ते सुभग विरहावस्थया व्यञ्जयन्ती

कार्श्यं येन त्यजति विधिना स त्वयैवोपपाद्य: ॥३०॥

प्राप्यावन्तीनुदयनकथाकोविदग्रामवृद्धान्
पूर्वोद्दिष्टामनुसर पुरीं श्रीविशालां विशालाम् ।
स्वल्पीभूते सुचरितफले स्वर्गिणां गां गतानां
शेषैः पुण्यैर्हृतमिव दिवः कान्तिमत् खण्डमेकम् ॥३१॥

दीर्घीकुर्वन् पटु मदकलं कूजितं सारसानां
प्रत्यूषेषु स्फुटितकमलामोदमैत्रीकषायः ।
यत्र स्त्रीणां हरति सुरतग्लानिमङ्गानुकूलः
शिप्रावातः प्रियतम इव प्रार्थनाचाटुकारः ॥३२॥

हारांस्तारांस्तरलगुटिकान् कोटिश: शङ्खशुक्ती:
शष्पश्यामान् मरकतमणीनुन्मयूखप्ररोहान् ।
दृष्ट्वा यस्यां विपणिरचितान् विद्रुमाणां च भङ्गान्
संलक्ष्यन्ते सलिलनिधयस्तोयमात्रावशेषा: ॥३३॥

प्रद्योतस्य प्रियदुहितरं वत्सराजोऽत्र जह्रे
हैमं तालद्रुमनवमभूदत्र तस्यैव राज्ञ: ।
अत्रोभ्द्रान्त: किल नलगिरि: स्तम्भमुत्पाटच्य दर्पाद्
इत्यागन्तून् रमयति जनो यत्र बन्धूनभिज्ञा: ॥३४॥

जालोग्दीर्णौरूपचितवपु: केशसंकारधूपै:

बन्ध्रुप्रीत्या भवनशिखिभिर्दत्तनृत्त्योपहार: ।

हर्म्येष्वस्या: कुसुमसुरभिष्वध्वखेदं नयेथा

लक्ष्मीं पश्यंल्ललितवनितापादरागाङ्किकतेषु ॥३५॥

भर्तु: कण्ठच्छविरिति गणै: सादरं वीक्ष्यमाण:

पुण्यं यायास्त्रिभुवनगुरोर्धाम चण्डीश्वरस्य ।

धूतोद्यानं कुवलयरजोगन्धिभिर्गन्धवत्या:

तोयक्रीडानिरतयुवतिस्त्रानतिक्त्तैर्मरुभ्दि: ॥३६॥

अप्यन्यस्मिञ् जलधर महाकालमासाद्य काले
स्थातव्यं ते नयनविषयं यावदत्येति भानु: ।
कुर्वन् संध्याबलिपटहतां शूलिन: श्लाघनीयां
आमन्द्राणां फलमविकलं लप्स्यसे गर्जितानाम् ॥३७॥

पादन्यासै: क्वणितरशनास्तत्र लीलावधूतै
रत्नच्छायाखचितवलिभिश्चामरै: क्लान्तहस्ता: ।
वेश्यास्त्वत्तो नखपदसुखान् प्राप्य वर्षाग्रबिन्दून्
आमोक्ष्यन्ते त्वयि मधुकरश्रेणिदीर्घान् कटाक्षान् ॥३८॥

पश्चादुच्चैर्भुजतरुवनं मण्डलेनाभिलीन:

सांध्यं तेज: प्रतिनवजपापुष्परक्तं दधान: ।

नृत्यारम्भे हर पशुपतेरार्द्रनागाजिनेच्छां

शान्तोद्वेगस्तिमितनयनं दृष्टभक्तिर्भवान्या ॥३९॥

गच्छन्तीनां रमणवसतिं योषितां तत्र नक्तं

रुद्धालोके नरपतिपथे सूचिभेद्यैस्तमोभि: ।

सौदामिन्या कनकनिकषस्निग्ध्या दर्शयोर्वीं

तोयोत्सर्गस्तनितमुखरो मा स्म भूर्विक्लवास्ता: ॥४०॥

तां कस्यां चिद् भवनवलभौ सुप्तपारावतायां
नीत्वा रात्रिं चिरविलसनात् खिन्नविद्युत्कलत्र: ।
दृष्टे सूर्ये पुनरपि भवान् वाहयेदध्वशेषं
मन्दायन्ते न खलु सु:ऋृदामभ्युपेतार्थकृत्या: ॥४१॥

तस्मिन् काले नयनसलिलं योषितां खण्डितानां
शान्तिं नेयं प्रणयिभिरतो वर्त्म भानोस्त्यजाशु ।
प्रालेयास्त्रं कमलवदनात् सोऽपि हर्तुं नलिन्या:
प्रत्यावृत्तस्त्वयि कररुधि स्यादनल्पाभ्यसूय: ॥४२॥

गम्भीराया: पयसि सरितश्चेतसीव प्रसन्ने
छायात्मापि प्रकृतिसुभगो लप्स्यते ते प्रवेशम् ।
तस्मात् तस्या: कुमुदविशदान्यर्हसि त्वं न धैर्यान्
मोघीकर्तुं चटुलशफरोद्वर्तनप्रेक्षितानि ॥४३॥

तस्या: किं चित् करधृतमिव प्राप्तवानीरशाखं
नीत्वा नीलं सलिलवसनं मुक्तरोधोनितम्बम् ।
प्रस्थानं ते कथमपि सखे लम्बमानस्य भावि
ज्ञातास्वादो विवृतजघनां को विहातुं समर्थ: ॥४४॥

त्वन्निष्यन्दोच्छ्वसितवसुधागन्धसंपर्करम्य:
स्त्रोतोरन्ध्रध्वनितसुभगं दन्तिभि: पीयमान्: ।
नीचैर्वास्यत्युपजिगमिषोर्देवपूर्वं गिरिं ते
शीतो वायु: परिणमयिता काननोदुम्बराणाम् ॥४५॥

तत्र स्कन्दं नियतवसतिं पुष्पमेघीकृतात्मा
पुष्पासारै: स्नपयतु भवान् व्योमगङ्गाजलार्द्रै: ।
रक्षाहेतोर्नवशशिभृता वासवीनां चमूनां
अत्यादित्यं हुतवहमुखे संभृतं तद् धि तेज: ॥४६॥

ज्योतिर्लेखावलयि गलितं यस्य बर्हं भवानी
पुत्रप्रेम्णा कुवलयपदप्रापि कर्णे करोति ।
धौतापाङ्गं हरशशिरुचा पावकेस्तं मयूरं
पश्चादद्रिग्रहणगुरुभिर्गर्जितैर्नर्तयेथा: ॥४७॥

आराध्यैनं शरवणभवं देवमुल्लङ्घिताध्वा
सिद्धद्वन्द्वैर्जलकणभयाद्वीणीभिर्मुक्तमार्ग: ।
व्यालम्बेथा: सुरभितनयालम्भजां मानयिष्यन्
स्त्रोतोमूर्त्या भुवि परिणतां रन्तिदेवस्य कीर्तिम् ॥४८॥

त्वय्यादातुं जलमवनते शार्ङ्गिणो वर्णचौरे
तस्या: सिन्धो: पृथुमपि तनुं दूरभावात् प्रवाहम् ।
प्रेक्षिश्यन्ते गगनगतयो नूनमावर्ज्य दृष्टी:
एकं मुक्तागुणामिव भुव: स्थूलमध्येन्द्रनीलम् ॥४९॥

तामुत्तीर्य व्रज परिचितभ्रूलताविभ्रमाणां
पक्ष्मोत्क्षेपादुपरिविलसत्कृष्णशरप्रभाणाम् ।
कुन्दक्षेपानुगमधुकरश्रीमुषामात्मबिम्बं
पात्रीकुर्वन् दशपुरवधूनेत्रकौतूहलानाम् ॥५०॥

ब्रह्मावर्तं जनपदमधश्छायया गाहमान:

क्षेत्रं क्षत्रप्रधनपिशुनं कौरवं तद् भजेथा: ।

राजन्यानां शितशरशतैर्यत्र गाण्डीवधन्वा

धारापातैस्त्वमिव कमलान्यभ्यवर्षन्मुखानि ॥५१॥

हित्वा हालामभिमतरसां रेवतीलोचनङ्कां

बन्धुप्रीत्या समरविमुखो लाङ्गली या: सिषेवे ।

कृत्वा तासामभिगममपां सौम्य सारस्वतीनां

अन्त:शुद्धस्त्वमपि भविता वर्णमात्रेण कृष्ण: ॥५२॥

तस्माद् गच्छेरनुकनखलं शैलराजावतीर्णां
जह्नो: कन्यां सगरतनयस्वर्गसोपानपङ्क्तिम् ।
गौरीवक्त्रभ्रुकुटिरचनां या विहस्येव फेनै:
शंभो: केशग्रहणमकरोदिन्दुलग्नोर्मिहस्ता ॥५३॥

तस्या: पातुं सुरगज इव व्योम्नि पूर्वार्धलम्बी
त्वं चेदच्छस्फटिकविशदं तर्कयेस्तिर्यगम्भ: ।
संसर्पन्त्या सपदि भवत: स्त्रोतसि चाययासौ
स्यादस्थानोपगतयमुनासङ्गमेवाभिरामा ॥५४॥

आसीनानां सुरभितशिलं नाभिगन्धैर्मृगाणां
तस्या एव प्रभवमचलं प्राप्य गौरं तुषारैः ।
वक्ष्यस्यध्वश्रमविनयने तस्य शृङ्गे निषण्णः
शोभां शुभ्रत्रिनयनवृषोत्खातपङ्कोपमेयाम् ॥५५॥

तं चेद् वायौ सरति सरलस्कन्धसङ्घट्टजन्मा
बाधेतोल्काक्षपितचमरीबालभारो दवाग्निः ।
अर्हस्येनं शमयितुमलं वारिधारासहस्त्रैः
आपन्नार्तिप्रशमनफलाः संपदो ह्युत्तमानाम् ॥५६॥

ये संरम्भोत्पतनरभसा: स्वाङ्गभङ्गाय तस्मिन्
मुक्ताध्वान सपदि शरभा लङ्घयेयुर्भवन्तम् ।
तान् कुर्वीथास्तुमुलकरकावृष्टिहासावकीर्णान्
के वा न स्यु: परिभवपदं निष्फलारम्भयन्ता: ॥५७॥

तत्र व्यक्तं दृषदि चरनन्यासमर्धेन्दुमौले:
शश्वत् सिद्धैरुपहृतबलिं भक्तिनम्र: परीया: ।
यस्मिन् दृष्टे करणविगमादूर्ध्वमुद्धूतपापा:
संकल्पन्ते स्थिरगणपदप्राप्तये श्रद्दधाना: ॥५८॥

शब्दायन्ते मधुरमनिलै: कीचका: पूर्यमाणा:
संसक्ताभिस्त्रिपुरविजयो गीयते किंनरिभि: ।
निर्ह्लादी ते मूरज इव चेत् कन्दरेषु ध्वनि: स्यात्
सङ्गीतार्थौ ननु पशुपतेस्तत्र भावी समग्र: ॥५९॥

प्रालेयाद्रेरुपतटमतिक्रम्य तांस्तान् विशेषान्
हंसद्वारं भृगुपतियशोवर्त्म यत् क्रौञ्चरन्ध्रम् ।
तेनोदीचीं दिशमनुसरेस्तिर्यगायामशोभी
श्याम् पादो बलिनियमनाभ्युद्यतस्येव विष्णो: ॥६०॥

गत्वा चोर्ध्वं दशमुखभुजोच्छ्वासितप्रस्थसंधे:
कैलासस्य त्रिदशवनितादर्पणस्यातिथि: स्या: ।
शृङ्गोच्छ्रायै: कुमुदविशदैर्यौ वितत्य स्थित: खं
राशीभूत: प्रतिदिनमिव त्र्यम्बकस्याट्टहास: ॥६१॥

उत्पश्यामि त्वयि तटगते स्निग्धभिन्नाञ्जनामे
सद्य:कृत्तद्विरददशनच्छेदगौरस्य तस्य ।
शोभामद्रे: स्तिमितनयनप्रेक्षणीयां भवित्रीं
अंसन्यस्ते सति हलभृतो मेचके वाससीव ॥६२॥

हित्वा तस्मिन्भुजगवलयं शंभुना दत्तहस्ता
क्रीडाशैले यदि च विचरेत् पादचारेण गौरी ।
भङ्गीभक्त्या विरचितवपु: स्तम्भितान्तर्जलौघ:
सोपानत्वं कुरु मणितटाहृणायाग्रयायी ॥६३॥

तत्रावश्यं वलयकुलिशोद्घट्टनोग्दीर्णतोयं
नेष्यन्ति त्वां सुरयुवतयो यन्त्रधारागृहत्वम् ।
ताभ्यो मोक्षस्तव यदि सखे धर्मलब्धस्य न स्यात्
क्रीडालोला: श्रवणपरुषैर्गर्जितैर्भाययेस्ता: ॥६४॥

हेमाम्भोजप्रसवि सलिलं मानसस्याददान:

कुर्वन् कामात् क्षणमुखपटप्रीतिमैरावतस्य ।

धुन्वन्कल्पद्रुमकिसलयान्यंशुकानीव वातै:

नानाचेष्टैर्जलद ललितैर्निर्विशेस्तं नगेन्द्रम् ॥६५॥

तस्योत्सङ्गे प्रणयिन इव स्त्रस्तगङ्गादुकूलां

न त्वं दृष्ट्वा न पुनरलकां ज्ञास्यसे कामचारिन् ।

या व: काले वहति सलिलोग्दारमुच्चैर्विमाना

मुक्ताजालग्रथितमलकं कामिनीवाभ्रवृन्दम् ॥६६॥

खण्ड २

उत्तरमेघ

विद्युत्वन्तं ललितवनिता: सेन्द्रचापं सचित्रा:
सङ्गीताय प्रहतमुरजा: स्निग्धगम्भीरघोषम् ।
अन्तस्तोयं मणिमायभुवस्तुङ्गमभ्रंलिहाग्रा:
प्रासादास्त्वां तुलयितुमलं यत्र तैस्तैर्विशेषै: ॥१॥

हस्ते लीलाकमलमलके बालकुन्दानुविद्धं
नीता लोध्रप्रसवरजसा पाण्डुतामानने श्री: ।
चूडापाशे नवकुरबकं चारु कर्णे शिरीषं
सीमन्ते च त्वदुपगमजं यत्र नीपं वधूनाम् ॥२॥

यत्रोन्मत्तभ्रमरमुखरा: पादपा नित्यपुष्पा
हंसश्रेणीरचितरशना नित्यपद्मा नलिन्य: ।
केकोत्कण्ठा भवनशिखिनो नित्यभास्वत्कलापा
नित्यज्योत्स्ना: प्रतिहततमोवृत्तिरम्या: प्रदोषा: ॥३॥

आनन्दोत्थं नयनसलिलं यत्र नान्यैर्निमित्तै:
नान्यस्ताप: कुसुमशरजादिष्टसंयोगसाध्यात् ।
नाप्यस्मात्प्रणयकलहाद्विप्रयोगपपत्ति:
वित्तेशानां न च खलु वयो यौवनादन्यदस्ति ॥४॥

यस्यां यक्षाः सितमणिमयान्येत्य हर्म्यस्थलानि
ज्योतिस्छायाकुसुमरचितान्युत्तमस्त्रीसहायाः ।
आसेवन्ते मधु रतिफलं कल्पवृक्षप्रसूतं
त्वग्दम्भीरध्वनिषु शनकैः पुष्करेष्वाहतेषु ॥५॥

मन्दाकिन्याः सलिलशिशिरैः सेव्यमाना मरुभ्दिः
मन्दारानामनुतटरुहां छायया वारितोष्णाः ।
अन्वेष्टव्यैः कनकसिकतमुष्टिनिक्षेपगूढैः
संक्रीडन्ते मणिभिरमरप्रार्थिता यत्र कन्याः ॥६॥

नीवीबन्धोच्छ्वसितशिथिलं यत्र बिम्बाधराणां
क्षौमं रागादनिभृतकरेष्वाक्षिपत्सु प्रियेषु ।
अर्चिष्टुङ्गानभिमुखमपि प्राप्य रत्नप्रदीपान्
ह्रीमूढानां भवति विफलप्रेराच्चूर्णमुष्टि: ॥७॥

नेत्रा नीता: सततगतिना यद्विमानाग्रभूमी:
आलेख्यानां नवजलकणैर्दोषमुत्पाद्य सद्य: ।
शङ्कास्पृष्टा इव जलमुचस्त्वादृशा जालमार्गै:
धूमोग्दारानुकृतिनिपुणा जर्जरा निष्पतन्ति ॥८॥

यत्र स्त्रीनां प्रियतमभुजालिङ्गनोच्छ्वासितानां
अङ्गग्लानिं सुरतजनितां तन्तुजालावलम्बा: ।
त्वत्संरोधापगमविशदैश्चन्द्रपादैर्निशीथे
व्यालुम्पन्ति स्फुटजललवस्यन्दिनश्चन्द्रकान्ता: ॥९॥

अक्षय्यान्तर्भवननिधय: प्रत्यहं रक्तकण्ठै:
उग्दायभ्दिर्धनपतियश: किंनरैर्यत्र साधम् ।
वैभ्राजाख्यं विबुधवनितावारमुखासहाया
बद्धालापा बहिरुपवनं कामिनो निर्विशन्ति ॥१०॥

गत्युत्कम्पादलकपतितैर्यत्र मन्दारपुष्पै:

पत्रच्छेदै: कनककमलै: कर्णविभ्रंशिभिश्च ।

मुक्ताजालै: स्तनपरिसरश्छिन्नसूत्रैश्च हारै:

नैशो मार्ग: सवितुरुदये सूच्यते कामिनीनाम् ॥११॥

वासश्चित्रं मधु नयनयोर्विभ्रमादेशदक्षं

पुष्पोभ्देदं सह किसलयैर्भूषणानां विकल्पान् ।

लाक्षारागं चरणकमलन्यासयोग्यं च यस्याम्

एक: सूते सकलमबलामण्डनं कल्पवृक्ष: ॥१२॥

पत्रश्यामा दिनकरहयस्पर्धिनो यत्र वाहा:
शैलोदग्रास्त्वमिव करिणो वृष्टिमन्त: प्रभेदात् ।
योधाग्रण्य: प्रतिदशमुखं संयुगे तस्थिवांस:
प्रत्यादिष्टाभरणरुचयश्चन्द्रहासव्रणाङ्कै: ॥१३॥

मत्वा देवं धनपतिसखं यत्र साक्षाद् वसन्तं
प्रायश्चापं न वहति भयान् मन्मथ: षट्पदज्यम् ।
सभ्रूभङ्गप्रहितनयनै: कामिलक्ष्येष्वमोघे:
तस्यारम्भश्चतुरवनिताविभ्रमैरेव सिद्धे: ॥१४॥

तत्रागारं धनपतिगृहानुत्तरेणास्मदीयं
दूराल्लक्ष्यं सुरपतिधनुश्चारुणा तोरणेन ।
यस्योपान्ते कृतकतनय: कान्तय वर्धितो मे
हस्तप्राप्यस्तबकनमितो बालमन्दारवृक्ष: ॥१५॥

वापि चास्मिन् मरकतशिलबद्धसोपानमार्गा
हैमैश्छन्ना विकचकमलै: स्निग्धवैदूर्यनालै: ।
यस्यास्तोये कृतवसातयो मानसं संनिकृष्टं
न ध्यास्यन्ति व्यपगतशुचस्त्वामपि प्रेक्ष्य हंसा: ॥१६॥

तस्यास्तीरे रचितशिखर: पेशलैरिन्द्रनीलै:

क्रीडाशैल: कनककदलीवेष्टनप्रेक्षणीय: ।

मग्देहिन्या: प्रिय इति सखे चेतसा कातरेण

प्रेक्ष्योपान्तस्फुरिततडितं त्वां तमेव स्मरामि ॥१७॥

रक्ताशोलश्चकिसलय: केसरश्चात्र कान्त:

प्रत्यासन्नौ कुरबकवृतेर्माधवीमण्डपस्य ।

एक: सख्यास्त्व सह मया वामपादाभिलाषी

काङ्क्षत्यन्यो वदनमदिरां दोहदच्छह्मनास्या: ॥१८॥

तन्मध्ये च स्फटिकफलका काञ्ची वासयष्टि:

मूले बद्धा मणिभिरनतिप्रौढवंशप्रकाशै: ।

तालै: शिञ्जावलयसुभगैर्नर्तित: कान्तया मे

यामध्यास्ते दिवसविगमे नीलकण्ठ: सुहृद् व: ॥१९॥

एभि: साधो हृदयनिहितैर्लक्षणैर्लयेथा

द्वारोपान्ते लिखितवपुषौ शङ्खपद्मो च दृष्ट्वा ।

क्षामच्छायं भवनमधुना मद्वियोगेन नूनं

सूर्यापाये न खलु कमलं पुष्यति स्वामभिख्याम् ॥२०॥

गत्वा सद्य: कलभतनुतां शीघ्रसंपातहेतो:
क्रीडाशैले प्रथमकथिते रम्यसाणौ निषण्ण: ।
अर्हयन्तर्भवनपतितां कर्तुमल्पाल्पभासं
खद्योतालीविलसितनिभां विद्युदुन्मेषदृष्टिम् ॥२१॥

तन्वी श्यामा शिखरदशना पक्वबिम्बाधरोष्ठी
मध्ये क्षामा चकितहरिणीप्रेक्षणा निम्ननाभि: ।
श्रोणीभारदलसगमना स्तोकनम्रा स्तनाभ्यां
या तत्र स्याद् युवतिविषये सृष्टिराद्येव धातु: ॥२२॥

तां जानीथा: परिमितकथां जीवितं मे द्वितीय
दूरीभूते मयि सहचरे चक्रवाकीमिवैकाम् ।
गाढोत्कण्ठा गुरुषु दिवसेष्वेषु गच्छत्सु बालां
जातां मन्ये शिशिरमथितां पद्मिनीं वान्यरूपाम् ॥२३॥

नूनं तस्या: प्रबलरुदितोच्छूननेत्रं प्रियाया
नि:ष्वासानामशिशिरतया भिन्नवर्णाधरोष्ठम् ।
हस्तन्यस्तं मुखमसकलव्यक्ति लम्बालकत्वाद्
इन्दोर्दैन्यं त्वदनुसरणक्लिष्टकान्तेर्बिभर्ति ॥२४॥

आलोके ते निपतति पुरा सा बलिव्याकुला वा
मत्सादृश्यं विरहतनु वा भावगम्यं लिखन्ती ।
पृच्छन्ती वा मधुरवचनां शारिकां पञ्जरस्थां
कच्चित् भर्तु: स्मरसि रसिके त्वं हि तस्य प्रियेति ॥२५॥

उत्सङ्गे वा मलिनवनसे सोम्य निक्षिप्य वीणां
मग्दोत्राङ्कं विरचितपदं गेयमुग्दातुकामा ।
तन्त्रीमार्द्रां नयनसलिलै: सारयित्वा कथं चिद्
भूयो भूय: स्वयमपि कृतां मूर्छनां विस्मरन्ती ॥२६॥

शेषान् मासान् विरहदिवसप्रस्थापितस्यावधेर्वा
विन्यस्यन्ती भुवि गणनया देहलीदत्तपुष्पै: ।
संयोगं मत्सङ्गं वा हृदयनिहितारम्भमास्वादयन्ती
प्रायेणैते रमणविरहेष्वङ्गनानां विनोदा: ॥२७॥

सव्यापारामहनि न तथा पीडयेन्मद्वियोग:
शङ्के रात्रौ गुरुतरशुचं निर्विनोदां सखीं ते ।
मत्संदेशै: सुखयितुमलं पश्य साध्वीं निशीथे
तामुन्निद्रामवनिशयनां सौधवातायनस्थ: ॥२८॥

आधिक्षामां विरहशयने संनिषण्णैकपार्श्वां
प्राचीमूले तनुमिव कलामात्रशेषां हिमांशो: ।
नीता रात्री: क्षण इव मया सार्धमिच्छारतैर्या
तामेवोष्णैर्विरहमहतीमश्रुभिर्यापयन्तीम् ॥२९॥

पादानिन्दोरमृतशिशिरान् जालमार्गप्रविष्टान्
पूर्वप्रीत्या गतमभिमुखं संनिवृत्तं तथैव ।
चक्षु: खेदात् सलिलगुरुभि: पक्ष्मभिश्छादयन्तीं
साभ्रेऽह्नीव स्थलकमलिनीं न प्रबुद्धां न सुप्ताम् ॥३०॥

निःश्वासेनाधरकिसलयक्लेशिना विक्षिपन्तीं
शुद्धस्नानात् परुषमलकं नूनमागण्डलम्बम् ।
मत्संभोगः कथमुपनयेत् स्वाप्नजोऽपीति निद्राम्
आकाङ्क्षन्तीं नयनसलिलोत्पीडरुद्धावकाशाम् ॥३१॥

आद्ये बद्धा विरहदिवसे या शिखा दाम् हित्वा
शापस्यान्ते विगलितशुचा तां मयोद्वेष्टनीयाम् ।
स्पर्शक्लिष्टामयमितनखेनासकृत् सारयन्तीं
गण्डाभोगात् कठिनविषमामेकवेणीं करेण ॥३२॥

सा संन्यस्ताभरणमबला पेशलं धारयन्ती

शय्योत्सङ्गे निहितमसकृद् दु:खदु:खेन गात्रम् ।

त्वामप्यस्त्रं नवजलमयं मोचयिष्यत्यवश्यं

प्राय: सर्वो भवति करुणावृत्तिरार्द्रान्तरात्मा ॥३३॥

जाने सख्यास्तव मयि मन: संभृतस्नेहमस्माद्

इत्थंभूतां प्रथमविरहे तामहं तर्कयामि ।

वाचालं मां न खलु सुभगंमन्यभाव: करोति

प्रत्यक्षं ते निखिलमचिराद् भ्रातरुक्तं मया यत् ॥३४

www.esahity.com

रुद्धापाङ्गप्रसरमलकैरञ्जनस्नेहशून्यं
प्रत्योदेशादपि च मधुनो विष्मृतभ्रूविलासम् ।
त्वय्यासन्ने नयनमुपरिस्पन्दि शङ्के मृगाक्ष्या
मीनक्षोभाच्चलकुवलयश्रीतुलामेष्यतीति ॥३५॥

वामश्चास्या: कररुहपदैर्मुच्यमानो मदीयै:
मुक्ताजालं चिरपरिचितं त्याजितो दैवगत्या ।
संभोगान्ते मम समुचितो हस्तसंवाहनानां
यास्यत्यूरु: सरसकदलीस्तम्भगौश्चलत्वम् ॥३६॥

तस्मिन् काले जलद यदि सा लब्धनिद्रासुखा स्याद्
अन्वास्यैनां स्तनितविमुखो याममात्रं सहस्व ।
मा भूदस्या: प्रणयिनि मयि स्वप्नलब्धे कथं चित्
सद्य: कण्ठच्युतभुजलताग्रन्थि गाढोपगूढम् ॥३७॥

तामुत्थाप्यस्वजलकणिकाशीतलेनानिलेन
प्रत्याश्वस्तां सममभिनवैर्जालकैर्मालतीनाम् ।
विद्युग्दर्भ: स्तिमितनयनां त्वत्सनाथे गवाक्षे
वक्तुं धीरस्तनितवचनैर्मानिनीं प्रक्रमेथा: ॥३८॥

भर्तुर्मित्रं प्रियमविधवे विद्धि मामम्बुवाहं
तत्संदेशैर्हृदयनिहितैरागतं त्वत्समीपम् ।
यो वृन्दानि त्वरयति पथि श्राम्यतां प्रोषितानां
मन्द्रस्निग्धैर्ध्वनिभिरबलावेणिमोक्षोत्सुकानि ॥३९॥

इत्याख्याते पवनतनयं मैथिलीवोन्मुखी सा
त्वामुत्कण्ठोच्छ्वसितहृदया वीक्ष्य संभव्य चैव ।
श्रौष्यत्यस्मात् परमवहिता सौम्य सीमनिनीनां
कान्तोदन्त: सुहृदुपनत: सङ्गमात्किंचिदून: ॥४०॥

तामायुष्मन् मम च वचनादात्मन: चोपकर्तुं
ब्रूयादेवं तव सहचरो रामगिर्याश्रमस्थ: ।
अव्यापन्न: कुशलमबले पृच्छति त्वां वियुक्त:
पूर्वाभाष्यं सुलभविपदां प्राणिनामेतदेव ॥४१॥

अङ्गेनाङ्गं प्रतनु तनुना गाढतप्तेन तप्तं
सास्त्रेणाश्रुद्रुतमविरतोत्कण्ठमुत्कण्ठितेन ।
उष्णोच्छ्वासं समधिकतरोच्छ्वासिना दूरवर्ती
सङ्कल्पैस्तैर्विशति विधिना वैरिणा रुद्धमार्ग: ॥४२॥

शब्दाख्येयं यदपि किल ते य: सखिनां पुरस्तात्
कर्णे लोल: कथयितुमभूदाननस्पर्शलोभात् ।
सोऽतिक्रान्त: श्रवणविषयं लोचनाभ्यामदृष्ट:
त्वामुत्कण्ठाविरचितपदं मन्मुखेनेदमाह ॥४३॥

श्यामास्वाङ्गं चकितहरिणीप्रेक्षणे दृष्टिपातं
वक्त्रच्छायां शशिनि शिखिनां बर्हभारेषु केशान् ।
उत्पश्यामि प्रतनुषु नदीवीचिषु भ्रूविलासान्
हन्तैकस्मिन्क्वचिदपि न ते चण्दि साद्रृश्यमस्ति ॥४४॥

त्वामालिख्य प्रणयकुपिता धातुरागै: शिलायां
आत्मानं ते चरणपतितं यावदिच्छामि कर्तुम् ।
अस्त्रैस्तावन् मुहुरुपचितैर्दृष्टिरालुप्यते मे
क्रूरस्तस्मिन्नापि न सहते सङ्गमं नौ कृतान्त: ॥४५॥

मामाकाशप्राणीहितभुजं निर्दयाश्लेषहेतो:
लब्धायास्ते कथमपि मया स्वप्नसंदर्शनेषु ।
पश्यन्तीनां न खलु बहुशो न स्थलीदेवतानां
मुक्तास्थूलास्तरुकिसलयेष्वश्रुलेशा: पतन्ति ॥४६॥

भित्त्वा सद्य: किसलयपुटान् देवदारुद्रुमाणां
ये तत्क्षीरस्त्रुतिसुरभयो दक्षिणेन प्रवृत्ता: ।
आलिङ्ग्यन्ते गुंणवति मया ते त्षाराद्रिवाता:
पूर्वस्पृष्टं यदि किल भवेदङ्गमेभिस्तवेति ॥४७॥

संक्षिप्येत क्षण इव कथं दीर्घयाम त्रियामा
सर्वावस्थास्वहरपि कथं मन्दमन्दातपं स्यात् ।
इत्थं चेतश्चटुलनयने दुर्लभप्रार्थनं मे
गाढोष्माभि: कृतमशरणं त्वद्वियोगव्यथाभि: ॥४८॥

नन्वात्मानं बहु विगणयन्नात्मनैवावलम्बै
तत् कल्याणि त्वमपि नितरां मा गम: कातरत्वम् ।
कस्यात्यन्तं सुखमुपनतं दु:खमेकान्ततो वा
नीचैर्गच्छत्युपरि च दशा चक्रनेमिक्रमेण ॥४९॥

शापान्तो मे भुजगशयनादुत्थिते शाङ्र्गपाणौ
शेषान्मासान् गमय चतुरो लोचने मीलयित्वा ।
पश्चादावां विरहगुणितं तं तमात्माभिलाषं
निर्वेक्ष्याव: परिणतशरच्चन्द्रिकासु क्षपासु ॥५०॥

भूयश्चाह त्वपमि शयने कण्ठलग्ना पुरा मे
निद्रां गत्वा किमपि रुदति सस्वनं विप्रबुद्धा ।
सान्तर्हासं कथितमसकृत् पृच्छतश्च त्वया मे
द्रष्टः स्वप्ने कितव रमयन् कामपि त्वं मयेति ॥५१॥

एतस्मान् मां कुशलिनमभिज्ञानदानाद् विदित्वा
मा कौलीनाच्चकितनयने मय्यविश्वासिनी भूः ।
स्नेहानाहुः किमपि विरहे ध्वंसिनस्ते त्वभोगाद्
इष्टे वस्तुन्युपचितरसाः प्रेमराशीभवन्ति ॥५२॥

आश्वास्यैवं प्रथमविरहोदग्रशोकां सखीं ते
शैलादाशु त्रिनयन्वृषोत्खातकूटान्निवृत्त: ।
साभिज्ञानप्रहितकुशलैस्तद्वचोभिर्ममापि
प्रात: कुन्दप्रसवशिथिलं जीवितं धारयेथा: ॥५३॥

कच्चित् सोम्य व्यवसितमिदं बन्धुकृत्यं त्वया मे
प्रत्यादेशान्न खलु भवतो धीरतां कल्पयामि ।
नि:शब्दोऽपि प्रदिशसि जलं याचितश्चातकेभ्य:
प्रत्युक्तं हि प्रणयिषु सतामीप्सितार्थक्रियैव ॥५४॥

एतत् कृत्वा प्रियमनुचितप्रार्थनावर्त्मनो मे
सौहर्दाद् वा विधुर इति वा मय्यनुक्रोशबुद्ध्या ।
इष्टान् देशान् विचर प्रावृषा संभृतश्री:
मा भूदेवं क्षणमपि च ते विद्युता विप्रयोग: ॥५५॥

महाकवी कालिदासांच्या उत्तुंग प्रतिभेने सर्वच कलाकारांना वेड लावले. कवी, गायक, नर्तक, संगीतकार, चित्रकार आणि स्थापत्यशास्त्रविशारदांनाही. रामटेक येथे ज्या ठिकाणी कालिदासांनी मेघदूत लिहिलं त्या जागी कालीदासांच्या प्रत्येक महाकाव्याचे एक म्युरल बनवलेले आहे आणि त्याच ठिकाणी कालीदास स्मारकही बांधलेले आहे. श्री. महेंद्र कुलकर्णी (http://kayvatelte.com या सुप्रसिद्ध ब्लॉगचे लेखक) यांनी त्या ठिकाणी काढलेली छायाचित्रं सोबत जोडत आहोत.

















या पुस्तकाच्या लेखिका धनश्री लेले या आपणा सर्वांना निवेदिका म्हणून ठाऊक आहेतच. त्यांच्या निवेदनाने साकार झालेले व्हिडिओ आपण या ठिकाणी पाहू शकता.

http://www.youtube.com/watch?v=cTBH3I7CJro

http://www.youtube.com/watch?v=0IoRi51xQbg

http://www.youtube.com/watch?v=Gjed_u0efas

http://www.youtube.com/watch?v=N_nUFkWMIFU

https://www.google.co.in/#q=dhanashree+lele&source=univ&tbm=vid&tbo=u&sa=X&ei=7QHZUYCrK4frrQeBjYD4Cw&sqi=2&ved=0CEgQqwQ&bav=on.2,or.r_qf.&bvm=bv.48705608,d.bmk&fp=ffb5dc655400e283&biw=1280&bih=595


1:17 / 5:18

e साहित्य प्रतिष्ठान®

www.esahity.com

महाकवी कालिदास, महान संस्कृत आणि मराठी साहित्याची सुवर्ण धरोहर एकिकडे, नवीन सृजनशील तरूण टॅलंटेड लेखक दुसरीकडे आणि जगाच्या कानाकोपऱ्यात पसरलेले कोट्यवधी मराठी वाचक तिसरीकडे. ई साहित्य प्रतिष्ठान या तिघांना जोडणारा दुवा होऊ इच्छिते. आपण यात सहभागी होऊ शकता. मदत करू शकता. पैसे नको. जाहिराती नको. फ़क्त आपल्या ओळखीच्या दहा मराठी लोकांचे ई मेल आय डी आम्हाला कळवा. त्यांना आम्ही मराठी साहित्य पाठवू. विनामूल्य.

आमचा पत्ता

esahity@gmail.com

अधिक माहितीसाठी

www.esahity.com